# संस्कृतवार्ता:

दिनाङ्कः-27.11.2025 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- हैदराबाद्-नगरे स्काईरूट्-इन्फिनिटी- कैम्पस इत्यस्य उद्घाटनावसरे भारतस्य अन्तरिक्षक्षेत्रं वैश्विकनिवेशकानां कृते आकर्षकं गम्यस्थानं भवन्नस्तीति प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तम्।
- राष्ट्रपतिः द्रौपदी मुर्मुः ओडिशा-विधानसभां सम्बोधितवती।
- रक्षामंत्री राजनाथसिंहः इण्डोनेशिया-देशस्य प्रतिरक्षामन्त्रिणा सह नवदेहल्यां तृतीय-रक्षामन्त्र्योः संवादस्य आध्यक्ष्यं कुर्वन् सामरिकसहभागित्वेन सह गहन-रक्षा-सहकारं च पुनः दृढीकृतवान्।
- आई. एम. एफ़. इत्यनेन भारतस्य अर्थव्यवस्था सुदृढा अस्ति, जी. एस्. टी. परिष्कारैः अमेरिकीय-शुल्कस्य प्रभावः न्यूनीकृतोऽस्तीति उक्तम्।
- इण्डोनेशिया-देशस्य उत्तर-सुमात्रा-प्रदेशे जलप्लावनेन भूस्खलनेन च चतुस्त्रिंशज्जनाः मृताः।

------------------------------------

<u>प्रधानमंत्री -स्काईरूट्स</u>

भारतस्य अन्तरिक्षक्षेत्रं वैश्विकनिवेशकानां कृते आकर्षकं लक्ष्यं भवन्नस्तीति प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तम्। अद्य दृश्यश्रव्य स्काईरूट्स-इन्फिनिटी-कैम्पस इति संस्थायाः उद्घाटनावसरे भाषमाणः श्रीमोदी, भारतसर्वकारेण अन्तरिक्षक्षेत्रे अनेकानि ऐतिहासिकानि परिष्काराणि स्वीकृतानीति अधोरेखितवान्। सः अवदत् यत्, सर्वकारेण अन्तरिक्षक्षेत्रं नैज-नवान्वेषणाय उद्घाटितमस्ति, येन देशस्य नवोद्योगिनः, वैज्ञानिकाश्च पर्यावरणव्यवस्थया सह सुसम्बद्धतया कार्यं कर्तुं समर्थाः भवन्ति। आगामिषु वर्षेषु वैश्विक-

अन्तरिक्ष-अर्थव्यवस्था बहुगुणिता वर्धिता भविष्यति, देशस्य युवभ्यश्च अद्भुतानि नूतनानि अवसराणि उद्घाटयिष्यन्तीति प्रधानमन्त्रिणा मोदिना उल्लिखितम्।

--------------------------------------

## राष्ट्रपति उडीसा

राष्ट्रपतिपदासीना द्रौपदीमुर्मु: अद्य ओडिशा विधानसभाया: शीतकालीन- सत्रस्य प्रथमे दिने सभां सम्बोधितवती। इतिहासे प्रथमवारं भारतस्य राष्ट्रपति: ओडिशा- विधानसभां सम्बोधयति। राष्ट्रपति: मुर्मु: स्वीय गृहराज्यस्य द्विदिवसीय यात्रायां अस्ति।

--------------------------------------

## राष्ट्रपतिः चाणक्य रक्षा

राष्ट्रपतिपदासीना द्रौपदी मुर्मुः अद्य उक्तवती यत् भारतीय-सशस्त्र-सेनाः राष्ट्रस्य सार्वभौमत्वस्य रक्षणे कौशलयुततया देशभक्तेः निदर्शनम् अकुर्वन्निति। नवदेहल्याम् अस्य वर्षस्य चाणक्य-डिफेंस-डायलाग 2025 इति संवादकार्यक्रमं सम्बोधयन्ती राष्ट्रपतिः अवदत् यत्, सशस्त्र-सेनाः प्रत्येकस्मिन् सुरक्षाप्रतिसन्धौ उल्लेखनीयां अनुकूलतां, संकल्पशक्तिश्च प्रदर्शितवन्तः। सा अग्रे अवोचत् यत् आपरेशन् सिन्दूर् इत्यस्मिन् सद्यः एव प्राप्ता सफलता देशस्य आतङ्कवाद-निरोधक कार्यनीतेः परिचायकः अस्ति। राष्ट्रपतिः अवधानं दत्तवती यत् विश्वं न केवलं भारतस्य सैन्यक्षमतायाः विषये, अपितु शान्तेः, नैतिक-स्पष्टतायाः विषये अपि अवधानं ददातीति।

अस्मिन् अवसरे सेनाध्यक्षः जनरल् उपेन्द्र द्विवेदी अवदत् यत्, संसारः बहुध्रुवीय-व्यवस्थायां वर्धमानः अस्ति, यत्र प्रमुखाः शक्तयः निरन्तरं युध्यन्ते, दीर्घकालिका शांतिश्च क्षीणा जायमानास्ति।

--------------------------------------

## राजनाथ्-भारत-इण्डोनेशिया संवादः

रक्षामन्त्री राजनाथसिंहः तस्य इण्डोनेशिया-देशस्य प्रतिरक्षामन्त्रिणा जाफर्ने जामसोद्दीन् इत्यनेन सह अद्य नवदेहल्यां भारत-इण्डोनेशिया-देशयोः रक्षामन्त्र्योः तृतीयसंवादस्य सह-अध्यक्षतां कृतवान्। उभयनेतृभ्यां दीर्घकालिक-सामरिकसहभागित्वम् अपि च उभयपक्षयोः मध्ये द्विपाक्षिकरक्षा-सहकारः अपि दृढीकृतः। सभायां, उभौ देशौ स्वतन्त्रं, मुक्तं, शान्तियुतं, स्थिरं, समृद्धं च इण्डो-पेसिफिक्-प्रदेशं निर्वोढनाय महत्त्वं प्रति बलम् दत्तवन्तौ।

-------------------------------------

## भारत -संयुक्तराज्यामेरिका

संयुक्तराज्यामेरिकादेशे भारतस्य राजदूतः विनयमोहन क्वात्रा, वाशिङ्गटन्-नगरे अमेरिकादेशस्य उपसचिवं जैकब एस. हेल्बर्ग इत्यनेन सह मिलित्वा परस्परं लाभप्रदं व्यापार-व्यवहारं तथा तन्त्रज्ञान-सहकारं च चर्चितवान्। सामाजिकान्तर्जालीय सन्देशे, श्रीक्वात्रा अवदत् यत्, व्यापार-व्यवहारः, सामरिक-व्यापार-संवादः, प्रौद्योगिकी-सहकारः इत्यादिषु द्विपक्षीय-आर्थिक-विषयेषु विस्तृतः संवादः अभवत्।

-------------------------------------

## अन्ताराष्ट्रिय-मुद्रा-कोष:

अन्ताराष्ट्रिय-मुद्रा-कोषेन IMF इत्यनेन भारतस्य अर्थव्यवस्था पञ्चविंशत्यधिक द्विसहस्र षड्विंशत्यधिक द्विसहस्रतम वर्षे षड् दशमलवाधिक षड् प्रतिशत-पर्यन्तं वृद्धिं प्राप्स्यति इति। भारतस्य कृते वार्षिकमूल्यांकनं समाप्य, तस्य कार्यकारि-मण्डलस्य वक्तव्ये, आई. एम्. एफ़्. इत्यनेन उल्लिखितं यत् वस्तु-सेवा-करः परिष्कारः, अमेरिकादेशेन आरोपितस्य पञ्चाशत् प्रतिशतस्य शुल्कस्य प्रतिकूलप्रभावात् देशं रक्षणाय साहाय्यं करोती।

-------------------------------------

## IFFI-2025

भारतीय- अन्ताराष्ट्रिय-चलच्चित्रमहोत्सव: IFFI-2025 इत्यस्य षट्पञ्चाशत्तमे संस्करणे, अद्य गोवा-राज्यस्य मुख्यमन्त्री श्रीप्रमोद सावन्तः सुप्रसिद्धस्य छायाच्चित्रग्राहकस्य चलच्चित्रनिर्मातुः च के. वैकुण्ठ-वर्यस्य सम्मानाय स्मारक-मुद्राङ्कनं प्रकाशितवान्। के. वैकुण्ठवर्येण पञ्चत्रिंशतधिकेषु चलचित्रेषु, विज्ञापनेषु, वृत्तचित्रेषु च कार्यम् कृतमस्ति।

-------------------------------------

## सर्वोच्चन्यायाल दिव्याङ्गजना:

सर्वोच्चन्यायालयेन केन्द्राय दिव्याङ्गजनान् विरुध्य अपमानजनकं वक्तव्यं वारयितुं कठोरविधिं विचारयितुं आदिष्टमस्ति। दिव्याङ्गानां गौरवस्य रक्षणार्थं कठोरस्य विधानस्य आवश्यकतायाः विषये अवधानं कृत्वा, सर्वोच्चन्यायालयेन अद्य केन्द्रम् उद्दिश्य, दिव्याङ्गानां तथा दुर्लभानां आनुवांशिक-विकाराणामुपरि व्यङ्ग्यापमानजनकं भाषणं एस्. सी.-एस्. टी. अधिनियमानुरूपं दण्डात्मक-अपराधं कर्तुं विधिनिर्माणस्य विषये विचारः करणीयः इति सूचितम्।

-------------------------------------

## केन्द्रीय-प्रत्यक्ष-कर-मण्डल

केन्द्रीय-प्रत्यक्ष-कर-मण्डलेन, सी. बी. डी. टी. इत्यनेन करदातृभ्यः अग्रिममासस्य एकत्रिंशत् दिनाङ्के उत वा पूर्वमेव हि स्वेच्छया स्वस्य विवरणपत्राणां समीक्षां संशोधनञ्च कर्तुम् दिङ्निर्देशाय एकं विशेषाभियानम् आरब्धमस्ति, येन दण्डात्मक-परिणामान् परिहर्तुं शक्यते।

-------------------------------------

## लोकसभाध्यक्षः-ओमबिरला

लोकसभाध्यक्षः ओमबिरला वर्यः अद्य नवदिल्ल्यां निम्नसदनस्य प्रथमाध्यक्षं गणेश-वासुदेव-मावलंकरं तस्य जन्मदिवसस्य अवसरे पुष्पांजलिम् अर्पितवान्। राज्यसभायाः

उपसभापतिः हरिवंशः, लोकसभायाः महासचिवः उत्पल कुमार सिंहः, अन्ये च गणमान्यजनाः अस्मिन् अवसरे उपस्थिताः आसन्। श्रीमावलंकरः सप्तत्रिंशदधिक-ऊनविंशति-शततमे वर्षे अहमदाबाद-नगरात् बाम्बे-विधानसभायाः सदस्यत्वेन स्वस्य विधायीयात्राम् आरब्धवान्, अपि च षड्चत्वारिंशदधिक-ऊनविंशति-शततम वर्ष पर्यन्तं तस्य अध्यक्ष: आसीत्।

---

**गृहमन्त्री अमितशाहः**

गृहमन्त्री अमितशाहः अद्य नवदिल्ल्यां बिहारस्य उपमुख्यमन्त्रिणा सम्राट् चौधरी इत्यनेन सह मिलितवान्। सामाजिकान्तर्जालीय सन्देशे श्रीशाहः अवदत् यत् बिहारस्य जनाः अत्यधिक-बहुमतेन एन्. डी. ए-सर्वकारस्य निर्माणं कृतवन्तः इति। सः अवदत् यत् एन्. डी. ए. सर्वकारः विकसितस्य बिहारस्य कृते सुशासनं सुनिश्चेतुं इतोऽपि अधिकशक्त्या कार्यं करिष्यति इति।

---

**इण्डोनेशिया- चक्रवातः**

इण्डोनेशिया-देशस्य उत्तर-सुमात्रा-प्रान्ते प्रचण्डवृष्ट्या जलप्लावनेन भूस्खलनेन च न्यूनातिन्यूनं चतुःत्रिंशत् जनाः मृताः। उत्तर-सुमात्रा-प्रदेशस्य आरक्षकाधिकारी फ़ेरी वालिन्टूकन् इत्येषः अवदत् यत् अधुनापि द्विपञ्चाशत् जनाः लुप्ताः सन्तीति। इण्डोनेशिया-देशस्य ऋतु-विभागस्यानुसारं, इण्डोनेशिया-देशस्य सुमात्रा-द्वीपे एकः दुर्लभ: उष्णकटिबन्धीय-चक्रवातः आगत्य प्रत्यावर्तितः इति।

।। इति वार्ता: ।।